॥ श्रीवेङ्कटेशसुप्रभातम् ॥



Sri Prasanna Venkatesaperumal
Suprabatham Association

(Regd. No. 78 / 61)

No 129/130 Govindappa Naick Street,
MADRAS-1

श्रीः

॥ श्रीवेङ्कटेशसुप्रभातम् ॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥१॥
उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥२॥
मातः समस्तजगतां मधुकैटभारे-
वक्षोविहारिणि मनोहरदिव्यमूर्ते ।
श्रीस्वामिनि श्रितजनप्रियदानशीले
श्रीवेङ्कटेशदयिते तव सुप्रभातम् ॥३॥

तव सुप्रभातमरविन्दलोचने
भवतु प्रसन्नमुखचन्द्रमण्डले ।
विधिशङ्करेन्द्रवनिताभिरर्चिते
वृषशैलनाथदयिते दयानिधे ॥४॥
अत्र्यादिसप्तऋषयः समुपास्य सन्ध्यां
आकाशसिन्धुकमलानि मनोहराणि ।
आदाय पादयुगमर्चयितुं प्रपन्नाः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥५॥
पञ्चाननाब्जभवषण्मुखवासवाद्या-
स्त्रैविक्रमादिचरितं विबुधाः स्तुवन्ति ।
भाषापतिः पठति वासरशुद्धिमारा-
च्छेषाद्रिशेखरविभो तव सुप्रभातम् ॥६॥
ईषत्प्रफुल्लसरसीरुहनारिकेल-
पूगद्रुमादिसुमनोहरपालिकानाम् ।
आवाति मन्दमनिलः सह दिव्यगन्धैः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥७॥

उन्मील्य नेत्रयुगमुत्तमपञ्जरस्थाः
पात्रावशिष्टकदलीफलपायसानि ।
भुक्त्वा सलीलमथ केलिशुकाः पठन्ति
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥८॥

तन्त्रीप्रकर्षमधुरस्वनया विपञ्च्या
गायत्यनन्तचरितं तव नारदोऽपि ।
भाषासमग्रमसकृत्करचारुरम्यं
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥९॥

भृङ्गावली च मकरन्दरसानुविद्ध-
झङ्कारगीतनिनदैः सह सेवनाय ।
निर्यात्युपान्तसरसीकमलोदरेभ्यः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥१०॥

योषागणेन वरदध्नि विमथ्यमाने
घोषालयेषु दधिमन्थनतीव्रघोषाः ।
रोषात्कलिं विदधते ककुभश्च कुम्भाः
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥११॥

पद्मेशमित्रशतपत्रगतालिवर्गा
हर्तुं श्रियं कुवलयस्य निजाङ्गलक्ष्म्या ।
भेरीनिनादमिव बिभ्रति तीव्रनादं
शेषाद्रिशेखरविभो तव सुप्रभातम् ॥१२॥

श्रीमन्नभीष्टवरदाखिललोकबन्धो
श्रीश्रीनिवास जगदेकदयैकसिन्धो ।
श्रीदेवतागृहभुजान्तरदिव्यमूर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥१३॥

श्रीस्वामिपुष्करिणिकाऽऽप्लवनिर्मलाङ्गाः
श्रेयोऽर्थिनो हरविरिञ्चिसनन्दनाद्याः ।
द्वारे वसन्ति वरवेत्रहतोत्तमाङ्गाः
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥१४॥

श्रीशेषशैलगरुडाचलवेङ्कटाद्रि-
नारायणाद्रिवृषभाद्रिवृषाद्रिमुख्याम् ।
आख्यां त्वदीयवसतेरनिशं वदन्ति
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥१५॥

सेवापराः शिवसुरेशकृशानुधर्म-
रक्षोऽम्बुनाथपवमानधनाधिनाथाः ।
बद्धाञ्जलिप्रविलसन्निजशीर्षदेशाः
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥१६॥

धाटीषु ते विहगराजमृगाधिराज-
नागाधिराजगजराजहयाधिराजाः ।
स्वस्वाधिकारमहिमादिकमर्थयन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥१७॥

सूर्येन्दुभौमबुधवाक्पतिकाव्यसौरि-
स्वर्भानुकेतुदिविषत्परिषत्प्रधानाः ।
त्वद्दासदासचरमावधिदासदासाः
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥१८॥

त्वत्पादधूलिभरितस्फुरितोत्तमाङ्गाः
स्वर्गापवर्गनिरपेक्षनिजान्तरङ्गाः ।
कल्पागमाकलनयाऽऽकुलतां लभन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥१९॥

त्वद्गोपुराग्रशिखराणि निरीक्षमाणाः
स्वर्गापवर्गपदवीं परमां श्रयन्तः ।
मर्त्या मनुष्यभुवने मतिमाश्रयन्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥२०॥

श्रीभूमिनायक दयादिगुणामृताब्धे
देवादिदेव जगदेकशरण्यमूर्ते ।
श्रीमन्ननन्तगरुडादिभिरर्चिताङ्घ्रे
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥२१॥

श्रीपद्मनाभ पुरुषोत्तम वासुदेव
वैकुण्ठ माधव जनार्दन चक्रपाणे ।
श्रीवत्सचिह्न शरणागतपारिजात
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥२२॥

कन्दर्पदर्पहरसुन्दरदिव्यमूर्ते
कान्ताकुचाम्बुरुहकुड्मललोलदृष्टे ।
कल्याणनिर्मलगुणाकरदिव्यकीर्ते
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥२३॥

मीनाकृते कमठ कोल नृसिंह वर्णिन्

स्वामिन् परश्वध तपोधन रामचन्द्र ।

शेषांशराम यदुनन्दन कल्किरूप

श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥२४॥

एलालवङ्गघनसारसुगन्धितीर्थं

दिव्यं वियत्सरिति हेमघटेषु पूर्णम् ।

धृत्वाद्य वैदिकशिखामणयः प्रहृष्टा-

स्तिष्ठन्ति वेङ्कटपते तव सुप्रभातम् ॥२५॥

भास्वानुदेति विकचानि सरोरुहाणि

सम्पूरयन्ति निनदैः ककुभो विहङ्गाः ।

श्रीवैष्णवाः सततमर्थितमङ्गलास्ते

धामाश्रयन्ति तव वेङ्कट सुप्रभातम् ॥२६॥

ब्रह्मादयः सुरवराः समहर्षयस्ते

सन्तः सनन्दनमुखास्तव योगिवर्याः ।

धामान्तिके तव हि मङ्गलवस्तुहस्ताः

श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥२७॥

लक्ष्मीनिवास निरवद्यगुणैकसिन्धो
संसारसागरसमुत्तरणैकसेतो ।
वेदान्तवेद्यनिजवैभव भक्तभोग्य
श्रीवेङ्कटाचलपते तव सुप्रभातम् ॥२८॥

इत्थं वृषाचलपतेरिह सुप्रभातं
ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः ।
तेषां प्रभातसमये स्मृतिरङ्गभाजां
प्रज्ञां परार्थसुलभां परमां प्रसूते ॥२९॥

॥ इति श्रीवेङ्कटेशसुप्रभातम् ॥

श्रीः

॥ श्रीवेङ्कटेशस्तोत्रम् ॥

कमलाकुचचूचुककुङ्कुमतो
नियतारुणितातुलनीलतनो ।
कमलायतलोचन लोकपते
विजयीभव वेङ्कटशैलपते ॥१॥

सचतुर्मुखषण्मुखपञ्चमुख-
प्रमुखाखिलदैवतमौलिमणे ।
शरणागतवत्सल सारनिधे
परिपालय मां वृषशैलपते ॥२॥

अतिवेलतया तव दुर्विषहै-
रनुवेलकृतैरपराधशतैः ।
भरितं त्वरितं वृषशैलपते
परया कृपया परिपाहि हरे ॥३॥

अधिवेङ्कटशैलमुदारमते-
जनताभिमताधिकदानरतात् ।
परदेवतया गदितान्निगमैः
कमलादयितान्न परं कलये ॥४॥

कलवेणुरवावशगोपवधू-
शतकोटिवृतात्स्मरकोटिसमात् ।
प्रतिवल्लविकाभिमतात्सुखदाद्
वसुदेवसुतान्न परं कलये ॥५॥

अभिरामगुणाकर दाशरथे
जगदेकधनुर्धर धीरमते ।
रघुनायक राम रमेश विभो
वरदो भव देव दयाजलधे ॥६॥

अवनीतनयाकमनीयकरं
रजनीकरचारुमुखाम्बुरुहम् ।
रजनीचरराजतमोमिहिरं
महनीयमहं रघुराममये ॥७॥

सुमुखं सुहृदं सुलभं सुखदं

स्वनुजं च सुकायममोघशरम् ।

अपहाय रघूद्वहमन्यमहं

न कथञ्चन कञ्चन जातु भजे ॥८॥

विना वेङ्कटेशं न नाथो न नाथः

सदा वेङ्कटेशं स्मरामि स्मरामि ।

हरे वेङ्कटेश प्रसीद प्रसीद

प्रियं वेङ्कटेश प्रयच्छ प्रयच्छ ॥९॥

अहं दूरतस्ते पदाम्भोजयुग्म-

प्रणामेच्छयाऽऽगत्य सेवां करोमि ।

सकृत्सेवया नित्यसेवाफलं त्वं

प्रयच्छ प्रयच्छ प्रभो वेङ्कटेश ॥१०॥

अज्ञानिना मया दोषा-
नशेषान् विहितान् हरे ।
क्षमस्व त्वं क्षमस्व त्वं
शेषशैलशिखामणे ॥११॥

॥ इति श्रीवेङ्कटेशस्तोत्रम् ॥

श्रीः

॥ श्रीवेङ्कटेशप्रपत्तिः ॥

ईशानां जगतोऽस्य वेङ्कटपते-
र्विष्णोः परां प्रेयसीं
तद्वक्षःस्थलनित्यवासरसिकां
तत्क्षान्तिसंवर्धिनीम् ।
पद्मालङ्कृतपाणिपल्लवयुगां
पद्मासनस्थां श्रियं
वात्सल्यादिगुणोज्ज्वलां भगवतीं
वन्दे जगन्मातरम् ॥१॥

श्रीमन् कृपाजलनिधे कृतसर्वलोक
सर्वज्ञ शक्त नतवत्सल सर्वशेषिन् ।
स्वामिन् सुशील सुलभाश्रितपारिजात
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥२॥
आनूपुरार्पितसुजातसुगन्धिपुष्प-
सौरभ्यसौभरकरौ समसन्निवेशौ ।
सौम्यौ सदानुभवनेऽपि नवानुभाव्यौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥३॥
सद्योविकासिसमुदित्वरसान्द्रराग-
सौरभ्यनिर्भरसरोरुहसाम्यवार्ताम् ।
सम्यक्षु साहसपदेषु विलेखयन्तौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥४॥
रेखाभयध्वजसुधाकलशातपत्र-
वज्राङ्कुशाम्बुरुहकल्पकशङ्खचक्रैः ।
भव्यैरलङ्कृततलौ परतत्त्वचिह्नैः
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥५॥

ताम्रोदरद्युतिपराजितपद्मरागौ
बाह्यैर्महोभिरभिभूतमहेन्द्रनीलौ ।
उद्यन्नखांशुभिरुदस्तशशाङ्कभासौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥६॥
सप्रेमभीति कमलाकरपल्लवाभ्यां
संवाहनेऽपि सपदि क्लममादधानौ ।
कान्ताववाङ्मनसगोचरसौकुमार्यौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥७॥
लक्ष्मीमहीतदनुरूपनिजानुभाव-
नीलादिदिव्यमहिषीकरपल्लवानाम् ।
आरुण्यसंक्रमणतः किल सान्द्ररागौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥८॥
नित्यानमद्विधिशिवादिकिरीटकोटि-
प्रत्युप्तदीप्तनवरत्नमहःप्ररोहैः ।
नीराजनाविधिमुदारमुपादधानौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥९॥

विष्णोः पदे परम इत्युदितप्रशंसौ
यौ मध्व उत्स इति भोग्यतयाप्युपात्तौ ।
भूयस्तथेति तव पाणितलप्रदिष्टौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥१०॥

पार्थाय तत्सदृशसारथिना त्वयैव
यौ दर्शितौ स्वचरणौ शरणं व्रजेति ।
भूयोऽपि मह्यमिह तौ करदर्शितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥११॥

मन्मूर्ध्नि कालियफणे विकटाटवीषु
श्रीवेङ्कटाद्रिशिखरे शिरसि श्रुतीनाम् ।
चित्तेऽप्यनन्यमनसां सममाहितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥१२॥

अम्लानहृष्यदवनीतलकीर्णपुष्पौ
श्रीवेङ्कटाद्रिशिखराभरणायमानौ ।
आनन्दिताखिलमनोनयनौ तवैतौ
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥१३॥

प्रायः प्रपन्नजनताप्रथमावगाह्यौ
मातुः स्तनाविव शिशोरमृतायमानौ ।
प्राप्तौ परस्परतुलामतुलान्तरौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥१४॥

सत्त्वोत्तरैः सततसेव्यपदाम्बुजेन
संसारतारकदयार्द्रदृगञ्चलेन ।
सौम्योपयन्तृमुनिना मम दर्शितौ ते
श्रीवेङ्कटेश चरणौ शरणं प्रपद्ये ॥१५॥

श्रीश श्रिया घटिकया त्वदुपायभावे
प्राप्ये त्वयि स्वयमुपेयतया स्फुरन्त्या ।
नित्याश्रिताय निरवद्यगुणाय तुभ्यं
स्यां किङ्करो वृषगिरीश न जातु मह्यम् ॥१६॥

॥ इति श्रीवेङ्कटेशप्रपत्तिः ॥

श्रीः

॥ श्रीवेङ्कटेशमङ्गलाशासनम् ॥

श्रियःकान्ताय कल्याणनिधये निधयेऽर्थिनाम् ।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम् ॥१॥

लक्ष्मीसविभ्रमालोकसुभ्रूविभ्रमचक्षुषे ।
चक्षुषे सर्वलोकानां वेङ्कटेशाय मङ्गलम् ॥२॥

श्रीवेङ्कटाद्रिशृङ्गाग्रमङ्गलाभरणाङ्घ्रये ।
मङ्गलानां निवासाय श्रीनिवासाय मङ्गलम् ॥३॥

सर्वावयवसौन्दर्यसंपदा सर्वचेतसाम् ।
सदा संमोहनायास्तु वेङ्कटेशाय मङ्गलम् ॥४॥

नित्याय निरवद्याय सत्यानन्तचिदात्मने ।
सर्वान्तरात्मने श्रीमद्वेङ्कटेशाय मङ्गलम् ॥५॥

स्वतः सर्वविदे सर्वशक्तये सर्वशेषिणे ।
सुलभाय सुशीलाय वेङ्कटेशाय मङ्गलम् ॥६॥

परस्मै ब्रह्मणे पूर्णकामाय परमात्मने ।
प्रयुञ्जे परतत्त्वाय वेङ्कटेशाय मङ्गलम् ॥७॥

आकालतत्त्वमश्रान्तमात्मनामनुपश्यताम् ।
अतृप्त्यमृतरूपाय वेङ्कटेशाय मङ्गलम् ॥८॥

प्रायः स्वचरणौ पुंसां शरण्यत्वेन पाणिना ।
कृपयाऽऽदिशते श्रीमद्वेङ्कटेशाय मङ्गलम् ॥९॥

दयामृततरङ्गिण्यास्तरङ्गैरिव शीतलैः ।
अपाङ्गैः सिञ्चते विश्वं वेङ्कटेशाय मङ्गलम् ॥१०॥

स्रग्भूषाम्बरहेतीनां सुषमावहमूर्तये ।
सर्वार्तिशमनायास्तु वेङ्कटेशाय मङ्गलम् ॥११॥

श्रीवैकुण्ठविरक्ताय स्वामिपुष्करिणीतटे ।
रमया रममाणाय वेङ्कटेशाय मङ्गलम् ॥१२॥

श्रीमत्सुन्दरजामातृमुनिमानसवासिने ।
सर्वलोकनिवासाय श्रीनिवासाय मङ्गलम् ॥१३॥

मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः ।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥१४॥

॥ इति श्रीवेङ्कटेशमङ्गलाशासनम् ॥

श्रीः

॥ श्रीमते रामानुजाय नमः ॥

गोविन्द हरे, गोपाल हरे ।
जय जय प्रभु, दीनदयाल हरे ॥१॥

ॐ पार्थाय प्रतिबोधितां भगवता
नारायणेन स्वयं
व्यासेन ग्रथितां पुराणमुनिना
मध्येमहाभारतम् ।
अद्वैतामृतवर्षिणीं भगवती-
मष्टादशाध्यायिनी-
मम्ब त्वामनु संदधामि भगवद्-
गीते भवद्वेषिणीम् ॥२॥

नमोऽस्तु ते व्यास विशालबुद्धे
फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः
प्रज्वालितो ज्ञानमयः प्रदीपः ॥३॥

प्रपन्नपारिजाताय तोत्त्रवेत्रैकपाणये ।
ज्ञानमुद्राय कृष्णाय गीतामृतदुहे नमः ॥४॥
वाचकः प्रणवो यस्य क्रीडावस्त्वखिलं जगत् ।
श्रुतिराज्ञा वपुर्ज्ञानं तं वन्दे देवकीसुतम् ॥५॥
सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।
पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥६॥
वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥७॥
भीष्मद्रोणतटा जयद्रथजला
गान्धारनीलोत्पला
शल्यग्राहवती कृपेण वहनी
कर्णेन वेलाकुला ।
अश्वत्थामविकर्णघोरमकरा
दुर्योधनावर्तिनी
सोत्तीर्णा खलु पाण्डवै रणनदी
कैवर्तकः केशवः ॥८॥

पाराशर्यवचःसरोजममलं
गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथा-
सम्बोधनाबोधितम् ।
लोके सज्जनषट्पदैरहरहः
पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमल-
प्रध्वंसि नः श्रेयसे ॥९॥

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम् ।
यत्कृपा तमहं वन्दे परमानन्दमाधवम् ॥१०॥

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः
स्तुन्वन्ति दिव्यैः स्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदै-
र्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा
पश्यन्ति यं योगिनो

यस्यान्तं न विदुः सुरासुरगणा
देवाय तस्मै नमः ॥११॥

हे राम पुरुषोत्तम नरहरे
नारायण केशव
गोविन्द गरुडध्वज गुणनिधे
दामोदर माधव ।
हे कृष्ण कमलापते यदुपते
सीतापते श्रीपते
वैकुण्ठाधिपते चराचरपते
लक्ष्मीपते पाहि माम् ॥१२॥

राम राम बोल, रामचन्द्र बोल ।
सीतासमेत श्रीरामचन्द्र बोल ॥१३॥

कृष्ण कृष्ण बोल, राधाकृष्ण बोल ।
राधासमेत श्रीराधाकृष्ण बोल ॥१४॥

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव ।

त्वमेव विद्या द्रविणं त्वमेव

त्वमेव सर्वं मम देवदेव ॥१५॥

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥१६॥

आदौ राम तपोवनादिगमनं

हत्वा मृगं काञ्चनं

वैदेहीहरणं जटायुमरणं

सुग्रीवसम्भाषणम् ।

बालीनिग्रहणं समुद्रतरणं

लङ्कापुरीदाहनं

पश्चाद् रावणकुम्भकर्णहननं

चैतद्धि रामायणम् ॥१७॥

आदौ देवकिदेवगर्भजननं

गोपीगृहे वर्धनं

मायापूतनजीवितापहरणं
गोवर्द्धनोद्धारणम् ।
कंसच्छेदनकौरवादिहननं
कुन्तीसुतापालनं
ह्येतद्भागवतं पुराणकथितं
श्रीकृष्णलीलामृतम् ॥१८॥

कस्तूरीतिलकं ललाटपटले
वक्षःस्थले कौस्तुभं
नासाग्रे नवमौक्तिकं करतले
वेणुं करे कङ्कणम् ।
सर्वाङ्गे हरिचन्दनं सुललितं
कण्ठे च मुक्तावली
गोपस्त्रीपरिवेष्टितो विजयते
गोपालचूडामणिः ॥१९॥

फुल्लेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।

गोपीनां नयनोत्पलार्चिततनुं गोगोपसंवेष्टितं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥२०॥

—:०:—

यं ब्रह्मा वरुणेन्द्ररुद्रमरुतः
स्तुन्वन्ति दिव्यैः स्तवै-
र्वेदैः साङ्गपदक्रमोपनिषदै-
र्गायन्ति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा
पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा
देवाय तस्मै नमः ॥

प्यारे ! जरा तो दिलसे विचारो,
क्या साथ लाये और क्या ले चलोगे ।
निष्काम होके दिन-रात गाओ,
गोविंद दामोदर माधवेति ॥
हे कृष्ण हे यादव हे सखेति ॥

गोविंद ! मेरी यही प्रार्थना है,
भूलूँ न मैं नाम कभी तुम्हारा ।
देहान्तकाले तुम सामने हो,
(मुरली) बंसी बजाते, मनको लुभाते ।
कहता यही मैं तन नाथ त्यागूँ,
गोविंद दामोदर माधवेति ॥
हे कृष्ण हे यादव हे सखेति ॥
आव आव रे श्रीकृष्ण प्यारा,
भक्त पुकारे रे अब तो आव रे ।
आव आव रे हनुमत प्यारा,
इष्ट तुम्हारा रे अब तो आव रे ॥

॥ शुभम् ॥

श्रीरस्तु

श्रीगोविन्दनामावलिः

श्रीनिवास गोविन्दा,
श्रीवेङ्कटेश ,,
भक्तवत्सल ,,
भागवतप्रिय ,,
नित्यनिर्मल ,,
नीलमेघश्याम ,,
गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा ।
पुराणपुरुष गोविन्दा,
पुण्डरीकाक्ष ,,
नंदनंदन ,,
नवनीतचोर ,,
पशुपालक कृष्ण ,,
पापविमोचन ,,

दुष्टसंहारण गोविन्दा,
दुरितनिवारण ,,
गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा ।

शिष्टपरिपालक गोविन्दा,
कष्टनिवारक ,,
वज्रमुकटधर ,,
वराहमूर्ति ,,
गोपीजनलोल ,,
गोवर्धनोधर ,,
दशरथनंदन ,,
दशमुखमर्दन ,,
गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा ।

पक्षिवाहन गोविन्दा,
पाण्डवप्रिय ,,
मत्स्यकूर्म ,,

मधुसूदनहरि गोविन्दा,
वराहनरसिंह ,,
वामन-भृगुराम ,,
बलरामानुज ,,
बुद्ध-कल्कि ,,
गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा ।

वेणुगानप्रिय गोविन्दा
वेङ्कटरमण ,,
सीतानायक ,,
श्रितपरिपालक ,,
दरिद्रजनपोषक ,,
धर्मसंस्थापक ,,
अनादिरक्षक ,,
आपद्बान्धव ,,
गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा ।

शरणागतवत्सल गोविन्दा,
करुणासागर ,,
कमलदलाक्ष ,,
कामितफलद ,,
पापविनाशक ,,
पाहि मुरारे ,,
श्रीमुद्राङ्कित ,,
श्रीवत्साङ्कित ,,
गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा ।
धरणीनायक गोविन्दा,
दिनकरतेजा ,,
पद्मावतिप्रिय ,,
प्रसन्नमूर्ति ,,
अभयहस्त ,,
अक्षयवरद ,,

शंखचक्रधर गोविन्दा,
पद्मगदाधर ,,
गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा।
विरजातीर्थ गोविन्दा,
विरोधिमर्दन ,,
शालिग्रामहर ,,
सहस्रनाम ,,
लक्ष्मीवल्लभ ,,
लक्ष्मणाग्रज ,,
कस्तूरीतिलक ,,
काञ्चनाम्बरधर ,,
गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा।
गरुडवाहन गोविन्दा,
गजराजरक्षक ,,
वानरसेवित ,,

वारिधिवन्दन गोविन्दा,
एडुकोंडलवाड ,,
एकस्वरूप ,,
रामकृष्ण ,,
रघुकुलनन्दन ,,

गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा ।

प्रत्यक्षदेव गोविन्दा,
परमदयाकर ,,
वज्रकवचधर ,,
वैजयन्तिमाल ,,
वड्डिकासुलवाडा ,,
वसुदेवसुत ,,
बिल्वपत्रार्चित ,,
भिक्षुकसंस्तुत ,,

गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा ।

स्त्रीपुंरूप गोविंदा,
शिवकेशवमूर्ति ,,
ब्रह्माण्डरूप ,,
भक्ततारक ,,
नित्यकल्याण ,,
नीरजनाभ ,,
हत्तीरामप्रिय ,,
हरिसर्वोत्तम ,,

गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा ।

जनार्दनमूर्ति गोविंदा,
जगत्साक्षिरूप ,,
अभिषेकप्रिय ,,
आपन्निरसन ,,
रत्नकिरीट ,,
रामानुजनुत ,,

स्वयंप्रकाश गोविन्दा,

नाश्रितवक्ष ,,

गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा।

नित्यशुभद गोविंदा,

निखिललोकेश ,,

आनन्दरूप ,,

आद्यन्तरहित ,,

इहपरदायक ,,

इहराजरक्षक ,,

पद्मदलाक्ष ,,

पद्मनाभ ,,

गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा।

तिरुमलनिबास गोविंदा,
तुलसीवनमाल ,,
शेषशायिन ,,
शेषाद्रिनिलय ,,
श्रीश्रीनिवास ,,
श्रीवेंकटेश ,,
गोविंदा हरि गोविंदा, गोकुलनंदन गोविंदा ॥

श्रीरस्तु

॥ श्रीमहालक्ष्म्यष्टकम् ॥

इन्द्र उवाच

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्खचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते ॥
नमस्ते गरुडारूढे कोलासुरभयंकरि ।
सर्वपापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥
सर्वज्ञे सर्ववरदे सर्वदुष्टभयंकरि ।
सर्वदुःखहरे देवि महालक्ष्मि नमोऽस्तु ते ॥
सिद्धिबुद्धिप्रदे देवि भुक्तिमुक्तिप्रदायिनि ।
मन्त्रमूर्ते सदा देवि महालक्ष्मि नमोऽस्तु ते ॥
आद्यन्तरहिते देवि आदिशक्तिमहेश्वरि ।
योगज्ञे योगसंभूते महालक्ष्मि नमोऽस्तु ते ॥
स्थूलसूक्ष्ममहारौद्रे महाशक्तिमहोदरे ।
महापापहरे देवि महालक्ष्मि नमोऽस्तु ते ॥

पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।
परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥
श्वेताम्बरधरे देवि नानालंकारभूषिते ।
जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ॥
महालक्ष्म्यष्टकं स्तोत्रं यः पठेद्भक्तिमान्नरः ।
सर्वसिद्धिमवाप्नोति राज्यं प्राप्नोति सर्वदा ॥
एककाले पठेन्नित्यं महापापविनाशनम् ।
द्विकालं यः पठेन्नित्यं धनधान्यसमन्वितः ॥
त्रिकालं यः पठेन्नित्यं महाशत्रुविनाशनम् ।
महालक्ष्मीर्भवेन्नित्यं प्रसन्ना वरदा शुभा ॥

॥ श्रियै नमः ॥

॥ श्रीलक्ष्म्यष्टोत्तरशतनामस्तोत्रम् ॥

देव्युवाच

देवदेव महादेव त्रिकालज्ञ महेश्वर ।
करुणाकर देवेश भक्तानुग्रहकारक ।
अष्टोत्तरशतं लक्ष्म्याः श्रोतुमिच्छामि तत्त्वतः ॥१॥

ईश्वर उवाच

देवि साधु महाभागे महाभाग्यप्रदायकम् ।
सर्वैश्वर्यकरं पुण्यं सर्वपापप्रणाशनम् ॥२॥
सर्वदारिद्र्यशमनं श्रवणाद् भुक्तिमुक्तिदम् ।
राजवश्यकरं दिव्यं गुह्याद्गुह्यतरं परम् ॥३॥
दुर्लभं सर्वदेवानां चतुष्षष्टिकलास्पदम् ।
पद्मादीनां वरान्तानां निधीनां नित्यदायकम् ॥४॥
समस्तदेवसंसेव्यमणिमाद्यष्टसिद्धिदम् ।
किमत्र बहुनोक्तेन देवीप्रत्यक्षदायकम् ॥५॥

तव प्रीत्याद्य वक्ष्यामि समाहितमनाः शृणु ।
अष्टोत्तरशतस्यास्य महालक्ष्मीस्तु देवता ॥६॥
क्लीं बीजं पदमित्युक्तं शक्तिस्तु भुवनेश्वरी ।
अङ्गन्यासः करन्यासः श्रीमित्यादिः प्रकीर्तितः॥७॥

॥ ध्यानम् ॥

वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
हस्ताभ्यामभयप्रदां मणिगणैर्नानाविधैर्भूषिताम् ।
भक्ताभीष्टफलप्रदां हरिहरब्रह्मादिभिः सेवितां
पार्श्वे पङ्कजशङ्खपद्मनिधिभिर्युक्तां सदा शक्तिभिः॥८॥
सरसिजनयने सरोजहस्ते
धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे
त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥९॥
प्रकृतिं विकृतिं विद्यां सर्वभूतहितप्रदाम् ।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकाम् ॥१०॥

वाचं पद्मालयां पद्मां
शुचिं स्वाहां स्वधां सुधाम् ।
धन्यां हिरण्मयीं लक्ष्मीं
नित्यपुष्टां विभावरीम् ॥११॥
अदितिं च दितिं दीप्तां
वसुदां वसुधारिणीम् ।
नमामि कमलां कान्तां
(क्षान्ति) क्षमां क्षीरोदसंभवाम् ॥१२॥
अनुग्रहपरां बुद्धि-
मनघां हरिवल्लभाम् ।
अशोकाममृतां दीप्तां
लोकशोकविनाशिनीम् ॥१३॥
नमामि धर्मनिलयां
करुणां लोक(वेद)मातरम् ।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुन्दरीम् ॥१४॥

पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमाम् ।
पद्ममालाधरां देवीं पद्मिनीं पद्मगन्धिनीम् ॥१५॥
पुण्यगन्धां सुप्रसन्नां
प्रसादाभिमुखीं प्रभाम् ।
नमामि चन्द्र (निलयां)वदनां
चन्द्रां चन्द्रसहोदरीम् ॥१६॥
चतुर्भुजां चन्द्ररूपामिन्दिरामिन्दुशीतलाम् ।
आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीम् ॥१७॥
विमलां विश्वजननीं तुष्टिं दारिद्र्यनाशिनीम् ।
प्रीतिपुष्करिणीं शान्तां शुक्लमाल्याम्बरां श्रियम्॥१८॥
भास्करीं बिल्वनिलयां वरारोहां यशस्विनीम् ।
वसुन्धरामुदाराङ्गां हरिणीं हेममालिनीम् ॥१९॥
धनधान्यकरीं सिद्धिं सदासौम्यां शुभप्रदाम् ।
नृपवेश्मगतानन्दां वरलक्ष्मीं वसुप्रदाम् ॥२०॥
शुभां हिरण्यप्राकारां समुद्रतनयां जयाम् ।
नमामि मङ्गलां देवीं विष्णुवक्षःस्थलस्थिताम् ॥२१॥

विष्णुपत्नीं प्रसन्नाक्षीं नारायणसमाश्रिताम् ।
दारिद्र्यध्वंसिनीं देवीं सर्वोपद्रववारिणीम् ॥२२॥
नवदुर्गां महाकालीं ब्रह्मविष्णुशिवात्मिकाम् ।
त्रिकालज्ञानसंपन्नां नमामि भुवनेश्वरीम् ॥२३॥

लक्ष्मीं क्षीरसमुद्रराजतनयां
श्रीरङ्गधामेश्वरीं
दासीभूतसमस्तदेववनितां
लोकैकदीपाङ्कुराम्
श्रीमन्मन्दकटाक्षलब्धविभव-
ब्रह्मेन्द्रगङ्गाधरां
त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां
वन्दे मुकुन्दप्रियाम् ॥२४॥

मातर्नमामि कमले कमलायताक्षि
श्रीविष्णुहृत्कमलवासिनि विश्वमातः ।
क्षीरोदजे कमलकोमलगर्भगौरि
लक्ष्मि प्रसीद सततं नमतां शरण्ये ॥२५॥

॥ फलश्रुतिः ॥

त्रिकालं यो जपेद्विद्वान् षण्मासं विजितेन्द्रियः ।
दारिद्र्यध्वंसनं कृत्वा सर्वमाप्नोति यत्नतः ॥२६॥
देवीनामसहस्रेषु पुण्यमष्टोत्तरं शतम् ।
येन श्रियमवाप्नोति दरिद्रः कोटिजन्मसु ॥२७॥
भृगुवारे शतं धीमान् पठेद्वत्सरमात्रकम् ।
अष्टैश्वर्यमवाप्नोति कुबेर इव भूतले ॥२८॥
दारिद्र्यमोचनं नाम स्तोत्रमम्बापरं शतम् ।
येन श्रियमवाप्नोति दरिद्रः कोटिजन्मसु ।
भुक्त्वा तु विपुलान् भोगानस्याः सायुज्यमाप्नुयात् ॥
प्रातःकाले पठेन्नित्यं सर्वदुःखोपशान्तये ।
पठंस्तु चिन्तयेद्देवीं सर्वाभरणभूषिताम् ॥३०॥

॥ इति श्रीलक्ष्म्यष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

॥ श्री लक्ष्म्यष्टोत्तरशतनामावलिः ॥

ओं प्रकृत्यै नमः, विकृत्यै, विद्यायै, सर्वभूतहितप्रदायै, श्रद्धायै, विभूत्यै, सुरभ्यै, परमात्मिकायै, वाचे, पद्मालयायै, पद्मायै, शुचये, स्वाहायै, स्वधायै, सुधायै, धन्यायै, हिरण्मय्यै, लक्ष्म्यै, नित्यपुष्टायै, विभावर्यै, अदित्यै, दित्यै, दीप्तायै, वसुधायै, वसुधारिण्यै, कमलायै, कान्तायै, (क्षान्त्यै) क्षमायै, क्षीरोदसंभवायै, अनुग्रहपरायै, बुद्धये, अनघायै, हरिवल्लभायै, अशोकायै, अमृतायै, दीप्तायै, लोकशोकविनाशिन्यै, धर्मनिलयायै, करुणायै, लोक (वेद)मात्रे, पद्मप्रियायै, पद्महस्तायै, पद्माक्ष्यै, पद्मसुन्दर्यै,

पद्मोद्भवायै, पद्ममुख्यै, पद्मनाभप्रियायै, रमायै, पद्ममालाधरायै, देव्यै, पद्मिन्यै, पद्मगन्धिन्यै, पुण्यगन्धायै, सुप्रसन्नायै, प्रसादाभिमुख्यै, प्रभायै, चन्द्रवदनायै (चन्द्रनिलयायै), चन्द्रायै, चन्द्रसहोदर्यै, चतुर्भुजायै, चन्द्ररूपायै, इन्दिरायै, इन्दुशीतलायै, आह्लादजनन्यै, पुष्ट्यै, शिवायै, शिवकर्यै, सत्यै, विमलायै, विश्वजनन्यै, तुष्ट्यै, दारिद्र्यना-शिन्यै, प्रीतिपुष्करिण्यै, शान्तायै, शुक्लमाल्याम्ब-रायै, श्रियै, भास्कर्यै, बिल्वनिलयायै, वरारोहायै, यशस्विन्यै, वसुंधरायै, उदाराङ्गायै, हरिण्यै, हेममालिन्यै, धनधान्यकर्यै, सिद्धये, सदासौम्यायै, शुभप्रदायै, नृपवेश्मगतानन्दायै, वरलक्ष्म्यै, वसुप्रदायै, शुभायै, हिरण्यप्राकारायै, समुद्रतनयायै,

जयायै, मङ्गलादेव्यै, विष्णुवक्षःस्थलस्थितायै, विष्णुपत्न्यै, प्रसन्नाक्ष्यै, नारायणसमाश्रितायै, दारिद्र्यध्वंसिन्यै, देव्यै, सर्वोपद्रववारिण्यै, नवदुर्गायै, महाकाल्यै, ब्रह्मविष्णुशिवात्मिकायै, त्रिकालज्ञानसंपन्नायै, भुवनेश्वर्यै नमः ।

॥ श्रीलक्ष्म्यष्टोत्तरशतनामावलिः समाप्ता ॥

प्रकाशक—खेतान ट्रेडिङ्ग कं०
१२९/१३०, गोबिन्दप्पा नायक स्ट्रीट
मद्रास—१

मिलने का पता—
महादेवलाल खेतान
१३, पगैयापट्टी स्ट्रीट
कलकत्ता—७

मुद्रक—संसार प्रेस, काशीपुरा, वाराणसी।

OUR OTHER ACTIVITIES:

1. Daily recitation of *Suprabatham* at 6-30 a. m. before the Sanctum Sanctorum of Lord Sri Venkateswaraswamy at Sri Byragimatan Temple. No. 2-3, General Muthiah Mudali St, Madras-1.
2. Daily recitation of *Sri Mahalakshmi Ashtothram* before the Sanctum Sanctorum of Sri Alarmelmanga Thayar.
3. Offering daily...
   (a) Flowers and Fruits to the Deities in the said Temple.
   (b) Camphor tablets for Harathi purposes.
   (c) Greens to sacred cow at Viswarupa Dharsanam.
4. Special Pujas on festival occasions at the Temple.